Roll No. ..........................

Total No. of Pages : 8

Total No. of Questions : 8

उत्तरमध्यमा द्वितीयखण्ड

**विषय कोड : 811**

## ज्योतिषम्

## पञ्चम् प्रश्नपत्रम्

## (ग्रहलाघवम्, जातकालङ्कारश्च)

समय : 3 घण्टे — पूर्णांक : 100

निर्देश :–

- सर्वे प्रश्नाः संस्कृतभाषयैव समाधेयाः।
- प्रत्येकस्य प्रश्नस्य अंकाः पृथक्-पृथक् प्रदत्ताः सन्ति।
- लघुत्तरीय-दीर्घोत्तरीयप्रश्नेषु विकल्परूपेण (अथवा) प्रश्नाः प्रदत्ताः सन्ति द्वयोः विकल्पयो एक एव प्रश्नः समाधेयः।

वस्तुनिष्ठप्रश्नाः –

1. निम्नलिखितानां प्रश्नानाम् उत्तराणि उचितं विकल्पं चित्वा ददत – 10×1=10

(1) तन्वादिषु द्वादशभावेषु 'कलत्र' इति संज्ञा कस्य भावस्य वर्तते ?

(अ) सप्तमभावस्य (ब) नवमभावस्य

(स) दशमभावस्य (द) एकादशभावस्य

(2) षष्ठेशः पापग्रहैः सह युक्तो लग्ने अष्टमे वा भावे स्थित्वा किं फलं प्रददाति ?

(अ) सन्तानप्राप्तिः भवति (ब) विदेशयात्रायोगो भवति

(स) शरीरे व्रणाः भवति (द) भूमिलाभो भवति



५७।

(3) क्रूरग्रहयुक्तः अष्टमेशः शत्रुभावे द्वादशभावे वा स्थितः किं फलं प्रयच्छति ?

(अ) आयुं वर्धते (ब) अल्पायुः प्रदत्ते

(स) धनलाभं करोति (द) वाहनसुखं प्रददाति

(4) कस्मिन् योगे जनाः सर्वकर्मसाधने असमर्थाः भवन्ति ?

(अ) सप्तमेशस्य बलहीनता कारणात्

(ब) पंचमेशस्य निर्बलत्वे सती

(स) यदा कर्मभावेशः निर्बलो भवति

(द) लग्नेशस्य विवीर्ये सती

(5) सूर्ये लग्नस्थे तथा शनौ सप्तमे गते किं फलं भवति ?

(अ) रोगपीडा (ब) गर्भाभावः

(स) द्रव्यनाशः (द) धननाशः

(6) लग्नेशबुधौ कुजचन्द्रौ वा राहुकेत्वोरन्यतरयुतौ तदा जातः कः रोगः भवति ?

(अ) काशरोगः (ब) क्षयरोगः

(स) श्वेतकुष्ठी (द) वातरोगः

(7) जातकस्य शरीरे विकलता भवति यदि –

(अ) केन्द्रस्थाने पापग्रहाः भवन्ति (ब) त्रिकोणे पापग्रहाः भवन्ति

(स) पणफणे पापग्रहाः भवन्ति (द) आपोक्लिमे पापग्रहाः भवन्ति

(8) लग्नस्थानात् चन्द्राद् वा सप्तमे यदि शुभग्रहाः अथवा सप्तमेशो भवति चेत् कः योगः भवति ?

(अ) विषकन्यायोगः (ब) विषकन्याभङ्गयोगः

(स) सुकन्यायोगः (द) विषयोगः



U92

(9) केन्द्रस्थितशुभग्रहैः दृष्टः पूर्णबली लग्नेशः किं फलं प्रददाति ?

(अ) अल्पायुः (ब) क्षीणायुः

(स) दीर्घायुः (द) सुबाहुः

(10) यदि शुभग्रहाः मुलत्रिकोणे तथा उच्चराशिस्थः बृहस्पतिः भवति एवं लग्नेशः पूर्णबली भवति चेत् जातकस्य कति वर्षात्मको आयुः भवति ?

(अ) षष्ठी वर्षाणि (ब) सप्तति वर्षाणि

(स) नवति वर्षाणि (द) अशीति वर्षाणि

2. अधोदत्तेषु विकल्पेषु उचितं विकल्पं चित्वा उत्तरं ददत – 10×1=10

(1) "अद्रिभूर्भुवः" इत्यनेन का संख्या वर्णिता ?

(अ) सप्तदशाधिकं शतम् (११७) (ब) सप्तत्यधिकं शतम् (१७०)

(स) दशाधिकैकशतम् (११०) (द) विंशत्यधिकैकशतम् (१२०)

(2) श्रीगणेशदेवज्ञेन कस्य ग्रहस्य अधोदत्ताः शीघ्रांकाः उक्ताः ?

(शीघ्रांका : ०/५८/११७/१७४/२२८/२७६/३२५/३६५/३६३/४००/३६८/२०६)

(अ) भौमस्य (ब) बुधस्य

(स) बृहस्पतेः (द) शुक्रस्य

(3) अधोदत्तेषु मन्दांकेषु के भौमस्य मन्दांकाः आचार्येण ग्रहलाघवे उक्ताः ?

(अ) ०/२६/५७/८५/१०६/१२४/१३०

(ब) ०/१२/२१/२८/३३/३५/३६

(स) ०/१४/२७/३६/४८/५५/५७

(द) ०/६/११/१३/१४/१५/१५



493

(4) अधोदत्तविकल्पेषु वृषराशेः लङ्कोदयमानं किम् अस्ति ?

(अ) २७८ (ब) २९९

(स) ३२३ (द) ३३२

(5) अधोदत्तविकल्पेषु सिंहराशेः लङ्कोदयमानं किम् अस्ति ?

(अ) २७८ (ब) ३२३

(स) २९९ (द) ३३२

(6) अयनांश सहितः सूर्यः केन नाम्नाविधीयते ?

(अ) दक्षिणायनसूर्यः (ब) उत्तरायणसूर्यः

(स) देवायनसूर्यः (द) सायनसूर्यः

(7) द्युदलतिथिवियोगास्तद्विनाड्यः .................. स्यात्।

(अ) चरम् (ब) नतम्

(स) शरम् (द) भुजम्

(8) चन्द्रग्रहणे कः कम् आच्छादयति ?

(अ) चन्द्रबिम्बं भूभा (ब) सूर्यबिम्बं चन्द्रमा

(स) चन्द्रबिम्बं भौमः (द) सूर्यबिम्बं भूभा

(9) सूर्ये ऋण राहोः कति भुजांशपर्यन्तं ग्रहणसम्भवो भवति ?

(अ) द्वादशभुजांशपर्यन्तम् (ब) चतुर्दशभुजांशपर्यन्तम्

(स) षोडशभुजांशपर्यन्तम् (द) अष्टादशभुजांशपर्यन्तम्

(10) गणितागतः पर्वान्तकालः ग्रहणस्य ..................।

(अ) स्पर्शकालो भवति (ब) मध्यकालो भवति

(स) सम्मीलनकालो भवति (द) मोक्षकालो भवति

3. अधोदत्तेषु विकल्पेषु समुचितं विकल्पं चित्वा युग्ममेलनं कुरुत – 5×1=5

(1) कर्केऽङ्गे सप्तसप्तौ खलविहगयुते पुष्करस्थे द्विजेशे

(2) बलाबलविवेकेन पुष्करालयशालिनाम्

(3) लग्नाधीशेऽर्थगे चेद्धनभवनपतौ

(4) कर्मस्थे लग्ननाथे गगनभवनपे लग्नगे

(5) जातकालङ्कारकर्तुः श्रीगणेशदैवस्य गुरोर्नाम

युग्ममेलनार्थं विकल्पा :

(क) शिवः

(ख) केन्द्रे याते शरविशिखमितं पुष्करे नीरगे वा।

(ग) भूपतिः स्यात्।

(घ) लग्नयातेऽर्थवान् स्यात्।

(ङ) सुमनोभिरिदं देश्यमायुर्धमादिशालिनाम्।

4. अधोदत्तानि रिक्तस्थानानि कोष्टकात् उचितपदं चित्वा प्रपूरयत : 5×2=10

**मञ्जूषा-**

| |
|---|
| भूमिभा, उन्नतांशाः, मध्यमरविः दक्षिणगोलः, उत्तरगोलः, कर्णः |

(1) भौमार्कीज्यविहीनः ........................ स्यात् स्वांशुकेन्द्रं तु।

(2) मेषादिषड्राशिस्थे ग्रहे ........................ तथा च तुलादिषड्राशिस्थे ग्रहे ........................।

(3) यन्त्रलवोत्थक्रान्तिलवाप्ता वस्विभदस्त्राः (२८८) स्यादिह ........................।

(4) क्रांत्यक्षजसंस्कृतिर्नतांशास्तद्धीना नवति स्युः ........................।

(5) छादयत्यर्कमिन्दुर्विधुं ........................।

5. सत्यकथनं प्रति 'सत्यम्' असत्यकथनं प्रति 'असत्यम्' इति लिखत : 5×2=10

(1) सप्तम-नवम-पंचमं च भावं बृहस्पतिः पूर्णदृष्ट्या पश्यति। (सत्यम्/असत्यम्)

(2) चन्द्रगुरूभौमाः सूर्यस्य मित्राणि न सन्ति। (सत्यम्/असत्यम्)

(3) जन्मलग्नात् चतुर्थभावे पापग्रहः पापग्रहाः अथवा बृहस्पतिः स्यात् तथा च पंचमे अथवा अष्टमे भावे चन्द्रः स्यात् तदा सन्तानप्राप्तौ त्रिंशतवर्षस्य बिलम्वः भवति। (सत्यम्/असत्यम्)

(4) जन्मसमये यावन्तो ग्रहाः सप्तमस्थाने स्थिताः सप्तमेशेन दृष्टाश्च भवन्ति जातकस्य तावन्तो विवाहाः भवन्ति। (सत्यम्/असत्यम्)

(5) यस्यजन्मसमये लग्नेशः अष्टमेशः तथा दशमेश एकादशेशश्च पणभणस्थानेषु स्थिताश्चेत् दीर्घायुयोगः भवति। (सत्यम्/असत्यम्)

6. निर्देशानुसारम् उत्तरत – 5×2=10

(1) श्रीगणेशदैवज्ञः कस्य मुखारविन्दात् श्रुत्वा योगान् वर्णितवान् ?

(2) श्वेतकुष्ठरोगयोगं वर्णयत् ?

(3) जातकालङ्कारे वर्णितप्लीहीरोगस्य किमपि एकं योगं वर्णयत्।

(4) विषकन्याभङ्गयोगं संक्षेपेण वर्णयत्।

(5) निम्नलिखित श्लोकस्य पादपूर्तिं कुरुत।

**श्लोक : –**

'लग्नाधीशोऽतिवीर्यो यदि शुभविहगैरीक्षितः केन्द्रयातैः।

...................... गुणगणसहितं श्रीयुतं मानवानाम्'॥

7. लघुत्तरीयाः प्रश्नाः – 7×5=35

(1) जातकालङ्कारोक्तनवग्रहाणां मित्रशत्रुसमग्रहाणां वर्णनं कुरुत।

**अथवा**

चतुर्थभावमाधारीकृत्य गृहप्राप्तियोगम्-अप्राप्तियोगं च वर्णनयत।



496

(2) ज्ञातकालङ्कारोक्तं परजातयोगं प्रतिपादयत।

**अथवा**

श्वेतकुष्ठ-रक्तकुष्ठरोगयोगं च वर्णयत।

(3) लग्नतः तृतीयभावपर्यन्तं वैपरीत्यस्थग्रहाणां भावफलं वर्णयत।

**अथवा**

'वागीशे हीनवीर्ये ………… 'इति श्लोकमाधारीकृत्यपूर्णायुयोगं अशीतिवर्षायुयोगं षष्ठीवर्षायुयोगं च वर्णयत।

(4) मेषादि द्वादशराशिनां लङ्कोदयमानं निरूपयन् कल्पितोदाहरणेन स्वोदयमानसाधनं कुरुत।

(स्पष्टसूर्य: ०२/१५/२४/४६, अयनांश: २३/३४/३६, इष्टकालम् ५५/१६, दिनमानम् ३२/१२, मेषादीराशीनां स्वोदयपलानि २२१, २५३, ३०४, ३४२, ३४५, ३३५, ३३५, ३४५, ३४२, ३०४, २५३, २२१)

(5) अधोदत्तमानानुसारं स्थूलक्रान्तिसाधनं कुरुत।

(सायनसूर्य: ०२/२७/२१/४२/०६, सायनसूर्यस्य भुजः ०१/०२/३८/१८, लघुखण्डा: ०६/०६/०५/०४/०२/०१)

**अथवा**

सूर्यक्रान्तिसाधनविधिं प्रदर्श्य अधोदत्तमानानुसारं सूर्यक्रान्तिसाधनं कुरुत।

(दिनार्थं १६/१२, चरपलानि ८२, पलभा ६/४७)

(6) अधोदत्तमानानामनुसारं सूर्यबिम्बमानस्य चन्द्रबिम्बमानस्य भूभामानस्य च साधनं कुरुत।

(सूर्यगति: ६१/११, चन्द्रगति: कलात्मक ८२३/५)

**अथवा**

खग्रासग्रहणं कथं सम्भवो भवति इति विवेचयत।

(7) अधोदत्तमानानामनुसारं लग्बनसाधन कथं क्रियते इति वर्णयत।

**अथवा**

ग्रहणस्य ग्रासमानानुसारं ग्रहणस्य वर्णः कथं भवति इति विवेचयत।

8. दीर्घोत्तरीयः प्रश्नः – 1×10=10

पंचताराग्रहाणां शीघ्रफलसाधनं कथं भवति इति विस्तरेण प्रतिपादयत।

**अथवा**

पंचताराग्रहाणां मन्दाङ्कान् विलिख्य मन्दकेन्द्रसाधनविधिं विस्तरेण प्रतिपादयत।

# आदर्श उत्तराणि

## उत्तरमध्यमा द्वितीयखण्डः

(विषयकोड–811)

विषयः– ज्योतिषम् ( ग्रहलाघवम्, जातकालङ्कारः )

समयः– घण्टात्रयम् पूर्णाङ्कः–100

वस्तुनिष्ठप्रश्नानामुत्तराणि –

**प्रश्नः 01.** निम्नलिखितानां प्रश्नानाम् उत्तराणि उचितं विकल्पं चित्वा वर्णयत – **10×1=10**

01. (अ) सप्तमभावस्य
02. (स) शरीरे व्रणाः भवन्ति
03. (ब) अल्पायुं करोति।
04. (स) यदा कर्मभावेशः निर्बलो भवति
05. (ब) गर्भाभावः
06. (स) श्वेतकुष्ठी
07. (अ) केन्द्रस्थाने पापग्रहाः भवन्ति
08. (ब) विषकन्याभङ्गयोगः
09. (स) दीर्घायुः
10. (द) अशीति वर्षाणि

**प्रश्नः 02.** अधोदत्तेषु विकल्पेषु उचितं विकल्पं चित्वा उत्तरं ददत – **10×1=10**

01. (अ) सप्तदशाधिकं शतम् (117)
02. (अ) भौमस्य
03. (अ) 0 / 29 / 57 / 85 / 109 / 124 / 130
04. (ब) 299
05. (स) 299
06. (द) सायन सूर्यः
07. (अ) चरम्
08. (अ) चन्द्रबिम्बं भूभा
09. (ब) चतुर्दशभुजाशंपर्यन्तम्

4199

10. (ब) मध्यकालो भवति

प्रश्नः 03. अधोदत्तेषु विकल्पेषु समुचितं विकल्पं चित्वा युग्ममेलनं कुरूत – 5×1=5

(01) (ख) केन्द्रे याते शरविशिखमितं पुष्करे नीरगे वा।

(02) (ङ) सुमनोभिरिदं देश्यमायुर्धमादिशालिनाम्।

(03) (घ) लग्नयातेऽर्थवान् स्यात्।

(04) (ग) भूपतिः स्यात्।

(05) (क) शिवः

प्रश्नः 04. अधोदत्तानि रिक्तस्थानानि कोष्टकात् उचितपदं चित्वा प्रपूरयत – 5×2=10

(01) मध्यम रविः

(02) उत्तरगोलः, दक्षिणगोलः

(03) कर्णः

(04) उन्नतांशाः

(05) भूमिभाः

प्रश्नः 05. सत्यकथनं प्रति 'सत्यम्' असत्यकथनं प्रति 'असत्यम्' इति लिखत– 5×2=10

(01) सत्यम्

(02) असत्यम्

(03) सत्यम्

(04) सत्यम्

(05) असत्यम्

प्रश्नः 06. निर्देशानुसारम् उत्तरत – 5×2=10

**01. श्रीगणेशदैवज्ञः कस्य मुखारविन्दात् निःश्रितान् योगान् जातकालङ्कारे वर्णितवान् ?**

उत्तरम् – शुकदेवमुखात् निःश्रितान् योगान् जातकालङ्कारे श्रीगणेशदैवज्ञः वर्णितवान् ?

**02. श्वेतकुष्ठरोगयोगं वर्णयत् ?**

उत्तरम् – लग्नेशबुधौ कुजचन्द्रौ वा राहुकेत्वोरन्यतरयुतौ तदा जातः श्वेतवर्णोपलक्षितकुष्ठरोगी भवति। उक्तं च –

" लग्नाधीशेन्दुपुत्रौ क्षितितनयनिशानायकौ क्वापि संस्थौ,

युक्तौ स्वर्भानुना वा भवति हि मनुजः केतुना श्वेत कुष्ठी।

**03. जातकालङ्कारे वर्णित प्लीही रोगस्य किमपि एकं योगं वर्णयत् ?**

500

उत्तरम् – षष्ठभावाधिपे चन्द्रे सौम्यदृष्टिरहिते केवलं क्रूरैर्दृष्टे प्लीहपीडितः स्यात् । अथवा कामाङ्गनाथे अर्थात् सप्तनाथे लग्ननाथे चन्द्रे केवलं क्रूरदृष्टे प्लीहवान् स्यात्। अथवा पापग्रहैर्दृष्टः शनिश्चतुर्थश्च अन्धः प्लीहवान् च स्यात्।

**04. विषाख्यभङ्गयोगं संक्षेपेण वर्णयत् ?**

उत्तरम् – लग्नात् चन्द्रात् वा सप्तमेशः सप्तमे भावे भवति चेत् विषाख्यदोषं तत्प्रयुक्तमनपत्यं वैधव्यदोषं च हन्ति। उक्तं च –

श्लोकः – ''लग्नादिन्दोः शुभो वा यदि मदनपतिर्द्युनयायी विषाख्या–

दोषं चैवानपत्यं तदनु च नियतं हन्ति वैधव्यदोषम्।।''

**05. निम्नलिखित श्लोकस्य पादपूर्तिं कुरूत ?**

**उत्तरम्** – लग्नाधीशोऽतिवीर्यो यदि शुभविहगैरीक्षितः केन्द्रयातैः,

दद्यादायुः सुदीर्घं गुणगणसहितं श्रीयुतं मानवानाम्।

**प्रश्नः– 06** लघुत्तरीयाः प्रश्नाः –

**01. जातकालङ्कारोक्तनवग्रहाणां मित्रशत्रुसमग्रहाणां वर्णनं कुरूत ?**

उत्तरम् – सूर्यस्य चन्द्रेज्यक्षितिजाः सुहृदः, बुधः समो अन्ये वैरिणः। रविबुधौ चन्द्रस्य मित्रे सर्वे अन्ये समाः। बृहस्पतिः चन्द्रः सूर्यश्च भौमस्य मित्राणि शुक्रशनी समौ, बुधः शत्रुः। शुक्रसूर्यौ बुधस्य मित्रे, भौमगुरूशनयः समाः, चन्द्रः शत्रुः। रविचन्द्रभौमाः गुरोर्मित्राणि, शनिः समः, बुधशुक्रौ शत्रू । बुधशनी शुक्रस्य मित्रे कुजगुरू समौ, रविचन्द्रौ शत्रू। सितज्ञौ शनेर्मित्रे, गुरूः समः, रवीन्दुभौमाः शत्रवः।। उक्तं च –

चन्द्रेज्यक्षितिजा रवीन्दुतनयौ गुविन्दुसूर्या क्रमा–

च्छुक्रार्कौ रविचन्द्रभूमितनया ज्ञार्की सितज्ञौ मताः।

अर्कादेः सुहृदः, समा अथ बुधः सर्वे हि शुक्रार्कजौ

भौमाचार्ययमाः यमः कुजगुरू पुज्यः परे वैरिणः।।

**अथवा**

**01. चतुर्थभावमाधारीकृत्य गृहप्राप्तियोगं अप्राप्तियोगं च वर्णयत –**

श्लोकः –

स्वक्षेत्रे तुर्यनाथस्तनुपतिसहितः स्यादकस्माद्गृहाप्तिः,

सौहार्दं वा सुहृद्भिस्तदितरगृहगश्चेद् गृहाऽलभ्ययोगः।

यावन्तः पापखेटा धनदशमगृहप्रान्त्यपैश्चेत्त्रिकस्था,

युक्तास्तावत्प्रमाणा ज्वलनवशगताः क्लेशदाः स्युर्गृहा नुः।।

अर्थात् लग्नेशसहितश्चतुर्थभावनाथः स्वक्षेत्रे चतुर्थभवने चेत्तदा जातस्य अकस्मात् गृहलाभः स्यात्। तथा सुहृद्भिः प्रीतिः भवति। तनुपतियुक्तः चतुर्थनाथः चतुर्थादन्यत्रभवनश्चेत्तदा गृप्राप्त्यभावः।

यावन्तः क्रूरग्रहाः द्वितीयदशमचतुर्थद्वादशनाथैः सहिताः त्रिकस्थाः जातकस्य तावन्तो गृहाः अग्निना दग्धाः भवन्ति अत एव क्लेशदाः स्युः।

**02. जातकालङ्कारोक्तं परजातयोगं प्रतिपादयत ?**

**उत्तरम्** – यस्य जन्मनि षष्टाष्टमभवननाथौ कुजविधुयुतौ चतुर्थस्थौ स्यातां तदानीं स नरः अन्यजातः जारजातः। तथा नवमषष्ठाधिनाथौ यत्र कुत्रपि स्थितौ क्रूरग्रहयुतौ अथवा केवलेन राहुणा शिखिना वा युतौ स्यातां तदान्यजातः। उक्तं च –

मातृस्थाने स्थितौ चेत्कुजविधुसहितौ षष्ठरन्ध्राधिनाथौ
स्यातां यस्य प्रसूतौ भवति खलु नरस्त्वन्यजातस्तदानीम्।
क्वापि स्थाने स्थितौ स्तः कलुषखगयुतौ भाग्यषष्ठाधिनाथौ
चेदेवं राहुणा वा तदनु च शिखिना सँय्युतावन्यजातः।।

**अथवा**

**02. श्वेतकुष्ठ–रक्तकुष्ठरोगयोगं च वर्णयत् ?**

**श्लोकः** –

लग्नाधीशेन्दुपुत्रौ क्षितितनयनिशानायकौ क्वापि संस्थौ,
युक्तौ स्वर्भानुना वा भवति हि मनुजः केतुना श्वेतकुष्ठी।
आदित्यो भौमयुक्तस्तदनु शनियुतो रक्तकृष्णाख्यकुष्ठी,
सार्को लग्नाधिनाथो व्ययरिपुनिधनस्थानगस्तापगण्डः।।

लग्नेशबुधौ कुजचन्द्रौ वा राहुकेत्वारन्यतरयुतौ तदा जातः श्वेतवर्णोपलक्षितकुष्ठरोगी भवति। तदनु भौमशनियुतः आदित्यश्चेद्रक्तवर्णकृष्णवर्णनामकः कुष्ठवान् स्यात्। सूर्ययुतो लग्नेशः त्रिकस्थश्चेत्तदा जातकस्य तापगण्डान्वितो गण्डो रोगविशेषः स्यात्।

**03. लग्नतः तृतीयभावपर्यन्तं वैपरीत्यस्थग्रहाणां भावफलं वर्णयत ?**

उत्तरम् – लग्नेशे धनगे धनेशे लग्नगे सति जातो धनवान् बुद्ध्याचारप्रवीणः उत्कृष्टपुण्यकृत् बलवान् भौगैकशीलश्च स्यात्। लग्नेशे सहजस्थे सहजेशे लग्नस्थे अल्पवीर्यः प्रशस्तबन्धुयुक्तः, राजपुज्यः, कुलजातानां सुखदः, मातृपक्षेण सहितश्च स्यात्। उक्तं च –

लग्नाधीशेऽर्थगे चेद्धनभनपतौ लग्नयातेऽर्थवान् स्याद्,
बुद्ध्याचारप्रवीणः परमसुकृतकृत्सारभृद्भोगशीलः।
भ्रातृस्थानेऽङ्गनाथे सहजभवनपे लग्नयातेऽल्पशक्तिः,
सद्बन्धू राजपूज्यः कुलजनसुखदो मातृपक्षेण युक्तः।।

**अथवा**

**03. 'वागीशे हीनवीर्ये..' इति श्लोकमाधारीकृत्य पूर्णायुयोगं अशीतिवर्षायुयोगं षष्ठीवर्षायुयोगं च वर्णयत ?**

श्लोकः –

वागीशे हीनवीर्ये व्ययतनुजगते यामिनीशे खशैला,

धर्मे सर्वैः परायुः खलखगलवगैः केन्द्रयातैरशीतिः।

क्रूरैःक्रूरर्क्षयातैः शुभभवनगतैः सौम्यखेटैः सवीर्ये,

लग्नेशे स्यात्परायुः सुतभवनगतैः षष्टिरायुर्नराणाम्।।

सर्वैः ग्रहैः धर्मे नवमे सद्भिः पूर्णायुः भवति। सर्वे ग्रहाः पापग्रहस्य नवांशे भूत्वा केन्द्रे भवन्ति चेत् अशीति वर्षात्मकायुः स्यात्। क्रूरग्रहाः क्रूरग्रहाणां राशिषु स्थिताः तथा शुभराशिषु शुभग्रहाः स्थिताः भवन्ति तथा लग्नेशः बलिनः भवन्ति चेत् पूर्णायुः योगः भवति। सर्वे ग्रहाः पंचमे स्थाने भवन्ति चेत् षष्ठीवर्षस्य आयुः भवति।

**04. मेषादि द्वादशराशिनां लङ्कोदयमानं निरूयन् कल्पितोदाहरणेन स्वोदयमानसाधनं कुरूत् –**

श्लोकः –

लङ्कोदया विघटिका गजभानिगोंऽक, दस्त्रास्त्रिपक्षदहनाः क्रमगोत्क्रमस्थाः।

हीनान्विताश्चरदलैः क्रमगोत्क्रमस्थैर्मेषादितो घटत उत्क्रमतस्त्विमे स्युः।।

अर्थात् द्वादशराशीनां लङ्कोदयमानानि पलात्मकानि उक्तानि तानि गजभानि अष्टसप्तत्याधिकशतद्वयम् 278, गोंऽकदस्त्रा एकोनवित्रंशती 299, त्रिपक्षदहनास्त्रयो विंशत्यधिकत्रिंशती 323, एते मेषादीनां त्रयाणाम् लङ्कोदयमानानि। ते एवोत्क्रमस्थाः कर्कादित्रयाणाम्। एते चरदलैः स्वदेशीयचरखण्डकैः क्रमगोत्क्रमस्थैः हीनान्विता कार्याः। क्रमस्थैस्त्रिभिः क्रमस्थास्त्रयोहीनाः। उत्क्रमस्थैस्त्रिभिरूत्क्रमस्थास्त्रयोः युक्ताः सन्तो मेषमारभ्य षण्णां राशीनाम् उदयाः स्युः। एते एव उत्क्रमतो घटस्तुलातः षडुदयाः स्युरित्यर्थः। ग्रन्थे प्रदत्तमुदाहरणं यथा –

| राशिनाम | लङ्कोदयमानानि | | काशेः सं. चरखण्डमानानि | | हीनान्वितयोगाः (स्वोदयपलानि) |
|---|---|---|---|---|---|
| मेषः / मीनः | 278 | – | 57 | = | 221 |
| वृषः / कुम्भः | 299 | – | 46 | = | 253 |
| मिथुनः / मकरः | 323 | – | 19 | = | 304 |
| कर्कः / धनुः | 323 | + | 19 | = | 342 |
| सिंहः / वृश्चिकः | 299 | + | 46 | = | 345 |
| कन्या / तुला | 278 | + | 57 | = | 335 |

**अथवा**

**अधोदत्तानां स्पष्टग्रहादीनां मानमाधारीकृत्य लग्नसाधनं कुरूत ?**

**उत्तरम् – श्लोकः**

**तत्कालार्कः सायनः स्वोदयघ्नाः भोग्यांशाः खत्र्युद्धता भोग्यकालः।**

**एवं यातांशैर्भवेद्यातकालो भोग्यः शोध्योऽभीष्टनाडीपलेभ्यः।।**

**तदनु जहीहि ग्रहोदयांश्च शेषं गगनगुणघ्नमशुद्धहृल्लवाद्यम्।**

**सहितभजादिग्रहैरशुद्धपूर्वैर्भवति विलग्नमदोऽयनांशहीनम्।।**

व्याख्या – यस्मिनकाले लग्नं साध्यते तत्कालीनः सूर्यः सायनोऽयनांशयुक्तः कार्यः। अस्य सूर्यस्य राशिवशाद्यः स्वदेशीय उदयस्तेन भोग्यांशा रवेस्त्रिंशच्च्युता भुक्तभागागुण्याः। ते खत्र्युद्धतास्त्रिंशद्भक्ताः सन्तः पलाद्यो रवेभोग्यकालः स्यात्। एवममुनैव प्रकारेण सायनस्य यातांशैभुक्तभागैर्यातकालो भुक्तकालः स्यात्। स यथा उदयगुणा भुक्तभागास्त्रिंशद् भक्ताः, इति लग्नभुक्तकालार्थामिदमुक्तम्। भोग्यकालः इष्टघटीनां पलेभ्यः शोध्यः। ततः किं विधेयमित्यत आह। तदनु तदनन्तरं ग्रहोदयान् तद्ग्रराश्युदयान् तस्मात् कालात् जहीहि यावन्तः शुद्धयन्ति तावन्तः शोधयेदित्यर्थः। यच्छेषं तद्गगनगुणघ्नं त्रिंशद्गुणमशुद्धेनोदयेन हृद्भक्तं लवाद्यं भागाद्यं यल्लब्धं तदजाद्यशुद्धपूर्वः सहितम्। अशुद्धोदयतः पूर्वं यावन्तो मेषादयो राश्यस्ते तस्य ऊर्ध्वस्थाने ग्रहे स्थाप्याः। तदयनांशहीनं सत् तात्कालिकं राश्यादिकं लग्नं भवति।

**उदाहरणम् –**

स्पष्टसूर्यः 0.15.24.49

अयनांशः + 0.23.34.49 = 1.08.58.49 सायनसूर्यः

इष्टकालः 55.19

दिनमानं – 32.19

मानक इष्टकालः 23.00

षड्राशियुक्तस्प. सूर्यः 06+1.8.58.49 = 7.8.58.49 मानकस्पस्टसायनसूर्यः

भुक्तांशाः 8.58.49 – 30.00.00 = 21.01.11 भोग्यांशाः

भोग्यांशाः 21.01.11 × 345 वृश्चिकराशेः स्वोदयपलानि = 7251.40.15

फलम् 7251.40.15 ÷ 30 = 241.43.20 लब्धिः

मानक इष्टकालः 23.00 × 60 = 1380.00 इष्टपलानि

लब्धिः 241.43.20 – 1380.00.00 = 1138.16.40

1138.16.40 – 342 धनुराशेः स्वोदयपलानि = 796.16.40

796.16.40 – 304 मकरराशेः स्वोदयपलानि = 492.16.40

492.16.40 – 253 कुम्भराशेः स्वोदयपलानि = 239.16.40

239.16.40 – 221 मीनराशेः स्वोदयपलानि = 18.16.40 शेष भोग्यपलानि

18.16.40 × 30 = 548.20.00 गुणनफलम्

548.20.00 ÷ 221 अशुद्धराशेः स्वोदयमानम् = 2.28.52 लब्धिः

2.28.52 + 12 शुद्धराशिसंख्या = 12.2.28.52 सायनलग्नम्

12.2.28.52 − 0.23.34.39 अयनांशः = 11.08.54.39 स्पष्टलग्नम्

**05. अधोदत्तमानानुसारं स्थूलक्रान्तिसाधनं कुरूत ?**

(सायनसूर्यः 02/27/21/42/09, सायनसूर्यस्य भुजः 01/02/38/18, लघुखण्डाः 06/06/05/04/02/01,)

उत्तरम् –

श्लोकः – षट् षडिषूदधिदृककुभिरधैः खेटयुजांशादिनांशमितैक्यम्।

शेषहतैष्यदिनांशयुतं वांशाद्यपमः सुखसंव्यवहृत्यै।।

अर्थात् 6, 6, 5, 4, 2, 1, एते लघुखण्डाः। एभिः रधैः खण्डैः कृत्वा खेटस्य सायनग्रहस्य यं भुजांशा भुजभागाः तेषां यो दिनाशः पंचाऽशांशः। तन्मितं खण्डैक्यं कार्यम् तच्छेषेण हतं यदेष्यं भोग्यखंण्डं तस्य यो दिनांशः पंचदशांशः तेन युतं तदंशाद्यापमो भगादिः सूखेन संव्यवहृति व्यवहारस्तदर्थं स्यात्।

उदाहरणं यथा –

सायनसूर्यः 1.24.2.41, सायनसूर्यस्य भुजांशाः 54.2.41

54.2.41 ÷ 15 = 03 फलम् तथा शेष 09.2.41

एतन्मितगतखण्डयोगः 6+6+5 = 17

शेष 9.2.41 × 4 एष्यखण्डः = 36.10.44 गुणनफलम्

गुणनफलम् 36.10.44 ÷ 15 = 2.24.43 लब्धिः

लब्धि 2.24.43 + 17 गतखण्डयुतिः = 1924.43 इति स्थूलक्रान्तिः।

अथवा

**5. सूर्यक्रान्तिसाधनविधिं प्रदर्श्य अधोदत्तमानानुसारं सूर्यक्रान्तिसाधनं कुरूत ?**

(दिनार्धं 16/12, चरपलानि 72, पलभा 6/47)

उत्तरम् – द्युदलतिथिवियोगास्तद्विनाड्यश्चरं स्यादथ निजगजभागोपेतमक्षप्रभाप्तम्।

दिनकृदपमभागास्तत्वलिप्तायुताः स्युर्द्यदलकृशपृथुत्वे ते क्रमाद्याम्यसौम्याः।।

व्याख्या ' अटा खेरज्ञाने दिनमानादेव क्रान्तिसाधनम् स्थूलं स्वयुक्तिदर्शनार्थमाह। द्युदलं दिनार्थं तिथयः पंचदशतर्योवियोगः षष्टिगुणश्चरपलानि स्युः। तच्चरं निजेन स्वीयेन गजभागेनाष्टांशेनोपेतं युक्तम्। ततोऽक्षप्रभयाप्तं भक्तं ते दिनकृतः सूर्यस्यापमत्यः क्रान्तेर्भागाः स्युः। ते तत्वकलाभिः पंचविंशतिकलार्चियुक्ताः कार्याः द्युदलस्य पंचदशघटिकाभ्यो न्यूनाधिकत्वे क्रमाद्याम्यसौम्याः कृशत्वे याम्याः अधिकत्वे सौम्या इत्यर्थः।

उदाहरणम् यथा –

दिनार्धं 16.12−15.00 घटिकाः = 1.12 चर

1 × 60 = 60 + 12 = 72 चरपलानि

72 × 8 = 9.0 चरपलानां अष्टमांशः

72.00 + 9.00 = 81.00

81.00 ÷ 6.047 = 11.55 लब्धिः

11.55 + 25 कला = 12.20 सूर्यस्य स्थूलक्रान्तिः। 15 घटिकातः अल्पत्वे सती याम्यः।

**06. अधोदत्तमानानामनुसारं सूर्यबिम्बमानस्य चन्द्रबिम्बमानस्य भूभामानस्य च साधनं कुरूत ?**

(सूर्यगतिः 61 / 11, चन्द्रगतिः कलात्मक 823 / 5,)

उत्तरम् –

श्लोकः – व्यसुंशरगतीष्वंशो दिग्युग्भवेद्वपुरूष्णगोरथ सितरूचो बिम्बं भुक्तिर्युगाचलभाजिता।

तदपि हिमगोर्बिम्बं त्रिघ्नं निजेशलवान्वितं विवसु भवति क्ष्माभाबिम्बं किलांगुलपूर्वकम्।।

अर्थात् कलादिसूर्यगत्यां पंचपंचाशत् अङ्कान् हीनं कृत्वा शेषभागस्य पंचमांशे दशसंख्या संयोजनेन अङ्गुलादिकं सूर्यबिम्बं भवति। चन्द्रस्य गतिः चतुः सप्तत्या भाजिता सती चन्द्रबिम्बं स्यात्। तथा भूभा बिम्बं तु चन्द्रस्य बिम्बं त्रिगुणं ततः निजेन एकादशांशेन युक् अष्टोनं सत् भुवो या छाया तस्या बिम्बं भूच्छायाबिम्बं भवतीत्यर्थः।

अथवा

**06. खग्रासग्रहणं कथं सम्भवो भवति इति विवेचयत ?**

**उत्तरम् –**

**श्लोकः – छादयत्यर्कमिन्दुर्बिधुं भूमिभा, छादकच्छाद्यमानैक्य खण्डं कुरू।**

**तच्छरोनं भवेच्छन्नमेतद्यदा, ग्राह्यहीनावशिष्टं तु खच्छन्नकम्।।**

अर्थात् चन्द्रोऽर्कं छादयति, भूमिभा चन्द्रमसं छायदति। सूर्यग्रहणे सूर्यचन्द्रयोः चन्द्रग्रहणे चन्द्रभूच्छाययोर्गे बिम्बे तयोर्यदैक्यं तस्य यत् खण्डमर्धं तत्तु कुरू तन्मार्नक्यखण्डमिति शरेण पूर्वसाधितेन ऊनं रहितं सद्यदवशिष्टं तच्छन्नमंगुलाद्योग्रासः स्यात्। चेन्मानैक्यखण्डाच्छरो न निर्गच्छति तदा ग्रहणमपि नास्तीति ज्ञेयम्। ततश्छन्नं यदा ग्राह्येन छाद्यबिम्बेन हीनं सदवशिष्टं तदा तु शेषतुल्यः खग्रासो भवति। खच्छन्नमिति यथार्थ नाम यतः सर्वबिम्बं ग्रासयित्वा काशमपि तावद्ग्रसितम्। इदं तु सर्वग्रहणम् एव भवति।

**07. अधोदत्तमानानामनुसारं लग्बनसाधनं कथं क्रियते इति विर्णयत ?**

उत्तरम् –

श्लोकः – लग्नं दर्शान्ते त्रिभोनं पृथकस्थं, तत्क्रान्त्यंशैः संस्कृतो नातांशाः।

तद् द्विद्वयं 22 शो वर्गितश्चेद् द्विकोर्ध्वोऽधोऽसौ द्वयूनः खण्डितस्तद्युतः सः।।

सार्को हारः स्यात् त्रिमोनोदयार्कविश्लेषांशा 10 शांशहीनघ्नशक्राः।

हाराप्ताः स्याल्लम्बनं नाडिकाद्यं तिथ्यां स्वर्णं वित्रिभेऽर्काधिकोने।।

अर्थात् अमान्ते लग्नं कृत्वा तत् त्रिभेन राशित्रयेण ऊनं सत् पृथक् स्थाप्यताम् तत् क्रान्त्यंशैः संस्कृतोऽक्षोऽक्षांशाः नातांशा स्युः। संस्कारस्तु एकदिशोयोगो भिन्न दिशोन्तरमिति प्रसिद्धः। तेषां नतांशानां यो द्विद्वयंशो द्वाविंशतिभागः स वर्गितः वर्गः सन् चेत् द्विकात् द्वयात् ऊर्ध्वोऽधिको भवति तदाऽसौ अधोऽन्यस्थाने स्थाप्यः। ततोऽत्र द्वयूनो द्विहीनः सन् खण्डितोऽर्धित यत् फलं तेन स पूर्वस्थापितो युतः। ततः सार्को द्वादशयुक्तः सन् हारः स्यात् ततस्त्रियाल्पं तथा कार्यं तस्य येंऽशाः। तेषां य आशांशो दशमांशः तेन हीनाः सगुणिताश्च ये शक्राश्चतुर्दश ते हाराप्तः सन्तो नाडिकाद्यं लम्बनं स्यात्। तत् तिथ्याममाघटीषु स्वर्णकार्यम्। कदेत्याह वित्रिभे त्रिभोन लग्ने अर्कादधिके धनम् ऊने ऋणमिति।

**अथवा**

**07 ग्रहणस्य ग्रासमानानुसारं ग्रहणस्य वर्णः कथं भवति इति विवेचयत ?**

**उत्तरम् –**

**श्लोकाः – मर्दादेवं मीलनोन्मीलने स्तो ग्रासो नादेर्श्योऽगुलाल्पो रवीन्द्वोः।**

**धूम्रः कृष्णः पिङ्गलोऽल्पार्घ सर्वग्रस्तश्चन्द्रोऽर्कस्तु कृष्णः सदैव।।**

रवीन्दोः सूर्यचन्द्रयोरंगुलादल्पो ग्रासो नादेभ्यः। यतोहि किरणबलवशादल्पग्रासो न दृश्यत इति प्रत्यक्षहेतुः। चन्द्रो हि अल्पार्ध सर्वग्रस्तो धूम्रादि स्यात्। तद्यथा अल्पग्रहे धूम्रवणोऽर्धग्रहः। कृष्णः सर्वग्रहः पिंगलः स्यात्। अर्काः सदा अल्पादिमासेषु कृष्ण एकवर्णः भवति।

**प्रश्नः 08. दीर्घोत्तरीयः प्रश्नः** 1×10=10

01. पंचताराग्रहाणां शीघ्रफलसाधनं कथं भवति इति विस्तरेण प्रतिपादयत् ?

उत्तरम् –

श्लोकः – भौमार्कीज्यविहीनमध्यमरविः स्यात् स्वाशुकेन्द्रं तु,

विदभृग्वोरूक्तमिदं रसोर्द्धमिनभाच्छुद्धं तदंशा दिनैः।

भक्ता खादिफलक्रमादिह गतांकोऽसौ क्षयद्घर्याहता–

च्छेषाद्बाणकुलब्धिहीनयुगयं दिग्ह्लवाद्यं फलम्।।

भौमः शनिः गुरूः एभिर्विहीनो मध्यमरविः स्वस्य आशुकेन्द्रं शीघ्रकेन्द्रं भवति। विद्भृग्वो शीघ्रकेन्द्रमहर्गणादुक्तमस्ति। एतत् केन्द्रं चेद्रसोर्ध्वं षड्राश्यादधिकं तर्हि इनभादद्वादशराशिभ्यः शुद्धं तस्यांशा दिनैः पंचदशभिर्भक्ताः सन्तः खादिफलक्रमस्तस्मादसौ गतांकः अग्रांकेन सह अन्तरे क्रियमाणे यः क्षयो वा वृद्वि स्यात् तया हताद् गुणिताच्छेषाद्बाणकुलब्धिः पंचदशांशस्तेन क्षये हीनः। वृद्धौ युक्तः कार्यः। असौ दिग्हृद्दशभक्तो भागायं शीघ्रफलं भवति। तन्मेषादिकेन्द्रे धनं तुलादिकेन्द्रे ऋणं पूर्वमेवोक्तमस्ति।

उत्पत्तिः – यदि पंचदशभागैरेकः शीघ्रांकस्तेदृष्टैः केन्द्रभागैः किम् ? एवं यल्लब्धं तन्मितो गतः स्यात्। ततः शेषादनुपातः। यदि पंचदशभागैर्गतैत्यान्तरतुल्या ह्रासवृद्धिर्लभ्यते तदा शेषांशैः किमिति। फलेन क्षये हीनो वृद्धौ युक्तो गतांककार्यं एव ततो दशगुणांकाः सन्त्यतो दशभिर्भक्तो भागाद्यं शीघ्रफलं भवतीत्युपपन्नम्।

उदाहरणं तु स्वविवेकानुसारं ईक्षणीयम् ।

अथवा

पंचताराग्रहाणां मन्दाङ्कान् विलिख्य मन्दकेन्द्रसाधनविधिं विस्तरेण प्रतिपादयत ?

उत्तरम् –

श्लोकौ – खं गोऽश्विनोऽद्रिमरूतोऽक्षगजा नवाशाः, सिद्धेन्दवः खदहनक्षितयोऽसृजोऽङ्काः।

मान्दा बुधस्य खमिनाः कुदृशोऽष्टपक्षा, देवाः शरानलमिता रसवह्यः स्युः।।

खेन्द्रर्क्षाणि नवाग्नयोऽह्युदधयोऽक्षाक्षा नगाक्षा गुरोः,

शुक्रस्याऽभ्ररसेशविश्वविश्वमनवो द्विर्बाण चन्द्राः क्रमात्।

खं गोऽब्ध्यद्रिषडग्निनामगृहतः स्यान्मन्दकेन्द्रं कुजात्।।

भौमादिपंचताराग्रहाणां मन्दफलसाधनार्थं शून्यादिकषडपर्यन्तम् मन्दाङ्काः –

भौमस्य – 0.29.57.85.109.124.130

बुधस्य – 0.12.21.28.33.35.36

बृहस्पतेः – 0.14.27.39.48.55.57

शुक्रस्य – 0.6.11.13.14.15.15

शनेः – 0.19.40.60.77.89.93

एते पंचताराग्रहाणां मन्दाङ्काः भवन्ति। यथा आचार्येण मध्यमाधिकारे सूर्यस्य मन्दोच्च स्थिरैकरूप 78 अंशस्य 2.18 उक्ताः तदनुगुणं पंचताराग्रहाणां अपि मन्दोच्च राशयः उक्ताः यथा भौमस्य 04, बुधस्य 07, बृहस्पतेः 06. शुक्रस्य 03. शनैश्चरस्य 08.राशयः मन्दोच्च भवति इति।

उपरोक्त मन्दोच्च राधिभ्यः पृथक् भोमादिषु ऋणकोर्येण तेषां पृथक्–पृथक् मन्दाङ्काः भवन्ति।

उदाहरणानि स्वबुद्धयाः अवलोकयितव्यः ।